# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-3)(New&Old)** | **प्रश्नपत्रम् – 7** | गुणाः –70 |
| विषयः – रामानुजवेदान्तः | **कोड –C.E.2.3.3** | समयः- 8 तः 11पर्यन्तम् |
| दिनाङ्कः –16/10/2019 | सन्दर्भग्रन्थः – श्रीमद्भगवद्गीता | |

### प्रथमान्वितिः (Unit 1)

गुणाः

**प्रश्न १ अधस्तनश्लोकेषु द्वयोः व्याख्यात्मकमुत्तरं लिखत।** १०

१ धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव किमकुर्वत संजय॥

२ निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन।
पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः॥

३ यद्यप्येते न पश्यन्ति लोभोपहतचेतसः।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम्॥

**प्रश्न २ कस्यचिदेकस्य उत्तरं लिखत।** १०

१ विषादयुक्तस्यार्जुनस्य स्थितिं प्रतिपादयत।

२ प्रथमाध्यायस्य सारांशं लिखत।

### द्वितीयान्वितिः (Unit 2)

**प्रश्न ३ अधस्तनप्रश्नेषु द्वयोः व्याख्यात्मकमुत्तरं लिखत।** १०

१ भगवान् कृष्णः विषीदन्तमर्जुनं किमुवाच?

२ आत्मनः तु अविनाशित्वं कथमुपपद्यते इति सविशदं प्रतिपादयत।

३ कर्मण्येवाधिकारस्ते इत्यस्य श्लोकस्य व्याख्यानं सविशदं विधेयम्।

**प्रश्न ४ कस्यचिदेकस्य उत्तरं लिखत ।** १०

१ आत्मनः यथार्थस्वरूपं प्रतिपादयत।

२ स्थितप्रज्ञस्यानुष्ठानप्रकारं प्रतिपादयत।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ अधस्तनश्लोकेषु द्वयोः व्याख्यात्मकमुत्तरं लिखत।** **१०**

१ लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्॥

२ कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।
इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते॥

३ श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥

**प्रश्न ६ कस्याप्येकस्य प्रश्नस्य सविशदमुत्तरं लिखत।** **१०**

१ कर्मयोगं अनुष्ठितो विदुषः अविदुषश्च विशेषमन्तरं प्रदर्शयत।

२ कर्मयोगस्य स्वरूपं प्रतिपादयत।

**प्रश्न ७ निम्नलिखितेषु दशप्रश्नानाम् लघूत्तराणि लिखत।** **१०**

१ दुर्योधनः व्यूढं पाण्डवानीकं दृष्ट्वा कमुपसंगम्य वचनमब्रवीत्?

२ सौभद्रः कः?

३ कः पाञ्चजन्यं शंखं दध्मौ?

४ गुडाकेशः इत्यस्य कोऽर्थः?

५ प्रथमाध्यायस्य  नामधेयं किम्?

६ देहिनो देहान्तरप्राप्तिर्भवति वा न भवति?

७ पंचविषया: के सन्ति?

८ नासतो विद्यते भावो इत्यत्र असतः इति पदस्य कोऽर्थः?

९ आत्मा नित्योऽस्ति वाऽनित्यः?

१० हन्यमाने शरीरे को न हन्यते?

११ कस्मात् क्रोधोऽभिजायते?

१२ 'प्रजापतिः' पदमिदं कस्य वाचकः?

१३ केन जीवसमुदायः आवृतः?

१४ तृतीयाध्याये कति श्लोकाः सन्ति?

१५ कर्मयोगः कस्मिन्नध्याये वर्णितः?